# E-Text

| | | |
|---|---|---|
| पत्रस्य नाम | : | लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्) |
| पत्रसंख्या | : | V |
| पाठ्यांशनाम | : | लोपः शाकल्यस्य, एकः पूर्वपरयोः, ओमाङोश्च इति सूत्रत्रयम् |
| पाठ्यांशसंख्या | : | 10 |

पाठ्यांशस्य मुख्याः अंशाः :

1) लोपः शाकल्यस्य इत्यत्र भो भगो अघो इत्येतेषां सम्बन्धः कुतो नास्ति।
2) सूत्रवृत्तौ पदान्तयोः इति कथं लब्धम्।
3) अवर्णपूर्वयोः, पदान्तयोः - इति दलोपादाने किं प्रयोजनम्।
4) अशि इति किमर्थम्।
5) अशि इत्यनर्थकमिति सिद्धान्तः।
6) एकः पूर्वपरयोरिति सूत्रे एकग्रहणं विनापि एकादेशत्वं कथम्।

विषयसूची


1.0 : उपोद्घातः
1.1 : लोपः शाकल्यस्य इत्यत्र भोभगोअघो इत्येतेषां सम्बन्धः कुतो नास्ति
1.2 : सूत्रवृत्तौ पदान्तयोः इति कथं लब्धम्
1.3 : अवर्णपूर्वयोः, पदान्तयोः इति दलोपादाने किं प्रयोजनम्
1.4 : अशि इति किमर्थम्
1.5 : अशि इत्यनर्थकमिति सिद्धान्तः
2.0 : एकः पूर्वपरयोः
2.1 : एकः पूर्वपरयोरिति सूत्रे एकग्रहणं विनापि एकादेशत्वं कथम्
3.0 : उरण् रपरः
4.0 : एत्येधत्यूठ्सु

## 1.0 उपोद्घातः

एचोऽयवायावः, वान्तो यि प्रत्यये, धातोस्तन्निमित्तस्यैव, क्षय्यजय्यौ शक्यार्थे, क्रय्यस्तदर्थे, भय्यप्रवय्ये च च्छन्दसि - इति षट् सूत्राणि, गोर्यूतौ छन्दस्युपसंख्यानम्, अध्वपरिमाणे च - इति द्वे वार्तिके च अय्-अव्-आय्-आव्- आदेशविधायकानि।

पूर्वस्मिन् पाठ्यांशे एचोऽयवायावः, वान्तो यि प्रत्यये, धातोस्तन्निमित्तस्यैव - इति सूत्रत्रयं गोर्यूतौ छन्दस्युपसंख्यानम्, अध्वपरिमाणे च - इति वार्तिकद्वयञ्च पठितम्। अयाद्यादेशा यदा पदान्ताः सम्भवन्ति तदा लोपः शाकल्यस्य इति त्रैपादिकेन सूत्रेण लोपः प्रवर्तते। तस्मात् तत् सूत्रमिह विचार्यते।

## 1.1 लोपः शाकल्यस्य इत्यत्र भोभगोअघो इत्येतेषां सम्बन्धः कुतो नास्ति

सूत्रार्थः -

1) रोः सुपि

2) भोभगोअघोअपूर्वस्य योऽशि

3) व्योर्लघुप्रयत्नतरः शाकटायनस्य

4) लोपः शाकल्यस्य

5) ओतो गार्ग्यस्य -इति सूत्रक्रमः।

भोभगोअघोअपूर्वस्य, अशि, व्योः - इति पदान्यनुवर्तन्ते। रोः इति पदं तु नानुवर्तते, स तस्मा आचष्टे (स तस्मै + आचष्टे) इत्यादिभाष्यप्रयोगदर्शनात् रोः इत्यस्य अनुवृत्त्यभावानुमानात्।

**1.2 सूत्रवृत्तौ पदान्तयोः इति कथं लब्धम्**

भोभगोअघो - इत्येतद्विषये अनेन विहतं वैकल्पिकलोपं बाधित्वा नित्यमेव लोपो विधीयते ओतो गार्ग्यस्य इति सूत्रेण। तथाच अपूर्वस्य इत्येव प्रकृतसूत्रे सम्बध्यते।

अशि परे अवर्णपूर्वयोः पदान्तयोः वकारयकारयोः विकल्पेन लोपः स्याद् - इति सूत्रार्थः।

**उदाहरणम् -**

1) हरे एहि – एचोऽयवायावः - हरय् एहि / हर एहि

2) विष्णो एहि – एचोऽयवायावः - विष्णव् एहि / विष्ण एहि

**1.3 अवर्णपूर्वयोः, पदान्तयोः - इति दलोपादाने किं प्रयोजनम्**

अवर्णपूर्वयोः इति पदं किमर्थम् - गौरी + अत्र = गौर्यत्र इत्यादौ रेफपूर्वकः यकारः, न त्ववर्णपूर्व इति कृत्वा लोपो न।

**पदान्तयोः इति किम्?**

पदस्य इत्यधिकृतम्। अवर्णपूर्वयोः व्योः इति तस्य विशेषणम्। तदन्तविधिना अवर्णपूर्वौ यौ वकारयकारौ तदन्तस्य पदस्य लोपः इत्यर्थः। कौमुद्यां तु फलितार्थः उच्यते - पदान्तयोः यवयोरिति। तदभावे हरये इत्यादौ हरे ङे -हरय् ए इति स्थिते यलोपापत्तिः।

1.4 अशि इति किमर्थम्

**शेखरे - अशि किम्। वृक्षं वेतीति वृक्षवीः। क्विप्। तमाचष्टे इति ण्यन्ताद् विच्। वृक्षव् करोति। क्विपि तु ऊठ् स्यात्।**

अशि इति पदं किमर्थम् - खफछठथचटतकपशषस - एतेषु परेषु यवयोः लोपो मा भूदित्येतदर्थम् अशि इत्युक्तं सूत्रे। एतेषु परेषु पदान्तयोः यकारवकारयोः अत्यन्तं विरळः सम्भवः। यथा - वृक्षं वेति इत्यर्थे वृक्षशब्दे उपपदे वीधातोः क्विपि वृक्षवीशब्दः। वृक्षव्यम् आचष्टे इत्यर्थे वृक्षवीशब्दात् 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' इति गणसूत्रेण णिच्। ततः, अन्येभ्योऽपि दृश्यन्ते इति सूत्रेण विच्। इष्ठवद्भावेन टिलोपे, णेरनिटि इति णिलोपे, विचः सर्वलोपे च वृक्षव् इति प्रातिपदिकं निष्पद्यते। ततः प्रथमैकवचने वृक्षव्।

वृक्षव् करोति इत्यादिवाक्ये ककारे परे वलोपो न भविष्यति अशि परे इत्युक्तत्वात्। अत्र विच् एव, न क्विप्, तथासति ऊठ् स्यात् , छ्वोः शूडनुनासिके च इति।

**शेखरे - विज्निमित्तको लोपो व्योरिति लोपस्तु न। णिलोपटिलोपयोः स्थानिवत्त्वात्।**

**अत्र प्रश्नः** - इष्ठवद्भावेन टिलोपे णेरनिटीति णिलोपे च वृक्षव् विच् इत्यवस्थायां वकारस्य वकारे परे लोपो व्योर्वलि इति सूत्रेण लोपः प्राप्नोति खलु -इति।

**उत्तरम्** - वृक्षवी णिच् विच् इत्यत्र टिलोपणिलोपयोः अचः परस्मिन् पूर्वविधौ इति स्थानिवद्भावेन वकारपरकत्वाभावात् वकारस्य लोपो न भविष्यति।

**शेखरे - प्रातिपदिकात् णिजुत्पत्त्या पदत्वाभावेन परपदस्थाजादेशाभावेन च लोपस्य पदचरमावयवत्वाभावेन च न पदान्त इति निषेधाप्रवृत्तेः। एतेन वनिमित्तको वलोपोऽत्र दुर्वार इत्यपास्तम्। किञ्च स्थानिवत्त्वनिषेधं विना अस्य पदान्तत्वासिद्ध्या अत्र निषेधाप्रवृत्तिः। स्थानिवत्त्वनिषेधज्ञाने पदान्तत्वज्ञानं तन्निर्णये च स्थानिवत्त्वा-भावज्ञानम् इत्यन्योन्याश्रयः तत्राप्रवृत्तौ मानम्।**

**अत्र पुनः प्रश्नः -**

अचः परस्मिन् पूर्वविधौ इति स्थानिवद्भावस्य न पदान्तद्विर्वचन...... इत्यादिना निषेधोऽस्ति। प्रकृते वृक्षव् करोति इत्यत्र वकारः पदान्तः, पदान्तस्य विधौ कर्तव्ये स्थानिवत्वनिषेधात् विचो वकारं निमित्तीकृत्य वलोपो भवत्येव खलु - इति।

**उत्तरम् -**

प्रातिपदिकात् णिच् क्रियते, न तु सुबन्तात्। तथाच, वृक्षव् विच् इत्यत्र वृक्षव् इत्येतावतः समुदायस्य पदत्वं नास्ति। किञ्च, न पदान्त....... इत्यत्र पदचरमावयवे कर्तव्ये स्थानिवत्वं नेत्यर्थः, प्रकृते वलोपो न पदचरमावयवः।

किञ्चात्र णिलोपटिलोपयोः स्थानिवत्वनिषेधेन टेः णेश्च अभावमाश्रित्य वकारस्य पदान्तत्वं वक्तव्यम्। वकारस्य पदान्तत्वेन च स्थानिवत्वनिषेधो वक्तव्य इत्यन्योन्याश्रयः। पदान्तत्वाभावे स्थानिवत्वनिषेधोऽपि न सिध्येत्।

**शेखरे - नच पदसंज्ञायां टिलोपस्य स्थानिवत्त्वात् वस्य पदान्तत्वमेव नास्तीति अशीति व्यर्थमिति वाच्यम्। पूर्वत्रासिद्धीय इति निषेधात्। साक्षात् पदत्वादिद्वारकपरम्परया वा पूर्वत्रासिद्धीयप्रापकस्य तत्प्रतिबन्धकस्य वा अतिदेशस्य तेन निषेधात्।**

**अत्र पुनः प्रश्नः -**

वृक्षव् करोति इत्यत्र वृक्षव् इति समुदायस्य सुप्तिङन्तं पदमिति सूत्रेण पदसंज्ञायां सत्यामेव वकारस्य पदान्तत्वप्रयुक्तलोपप्राप्तिः, तद्वारणार्थम् अश्ग्रहणञ्च। किन्तु - पदसंज्ञायां कर्तव्यायां टिलोपस्य स्थानिवद्भावे सति ईकारस्यैव पदान्तत्वं, न तु वकारस्य। तथाच पदान्तत्वाभावादेव लोपाप्राप्त्या तद्वारणार्थम् अश्ग्रहणं व्यर्थं खलु - इति।

**उत्तरम् -**

पूर्वत्रासिद्धीये न स्थानिवत् इति वार्तिकमस्ति। पूर्वत्रासिद्धीयस्य प्रवृत्त्यर्थं प्रतिबन्धार्थं वा स्थानिवत्वं नाश्रयणीयमिति तदाशयः। प्रकृते लोपः शाकल्यस्येति पूर्वत्रासिद्धीयम्, तस्य प्रतिबन्धार्थं स्थानिवत्वं नाश्रयितुं शक्यते।

**शेखरे - परे तु न पदान्ता हलोऽणः सन्ति इति लण्सूत्रस्थभाष्यात् वृक्षवादेरनभिधानमेव। भोभगो इति सूत्रे अश्ग्रहणमनर्थकम् अन्यत्राभावात् इति वार्तिकाच्च। अशोऽन्यत्र तन्निमित्तककार्य कार्यिणोऽभावादिति तदर्थः।**

**1.5 अशि इत्यनर्थकमिति सिद्धान्तः**

वृक्षव् इत्यादेः अनभिधानम्। तत्र प्रमाणम् -

1) न पदान्ता हलः अणः सन्ति - इति लण्सूत्रस्थं भाष्यम्।

2) अश्ग्रहणमनर्थकम् अन्यत्राभावात् - इति भोभगोअघोसूत्रस्थं वार्तिकम्।

**2.0 एकः पूर्वपरयोः**

एकः पूर्वपरयोरित्यधिकारसूत्रम्। अस्मिन्नधिकारे एकादेशसन्धिविधायकानि सूत्राणि निविष्टानि विद्यन्ते। तत्र पूर्वपरयोरिति षष्ठीद्विवचनान्तम्। षष्ठी स्थानेयोगा इति परिभाषानुरोधेन पूर्वपरयोः स्थाने इत्यर्थः।

आद् गुणः, वृद्धिरेचि इत्यादिसूत्रेषु पूर्वपरयोरेक इति पदद्वयमनुवर्तते। तथाच - अवर्णाद् अचि पूर्वपरयोरेको गुणः, अवर्णादेचि पूर्वपरयोरेको वृद्धिः- इत्येवमर्थः लभ्यते।

**2.1 एकः पूर्वपरयोरिति सूत्रे एकग्रहणं विनापि एकादेशत्वं कथम्**

**शेखरे - गुण इत्यादेः विधेयसमर्पकत्वेन तत्र एकत्वसंख्याया विवक्षणेन उभयोः पूर्वपरयोः एकवाक्यतयैव विधेयान्वयेन चानयोः पूलयोः कटं कुर्वित्यादितः इव उभयसम्बन्ध्येक विधेयस्यैव प्रतीतेः एकग्रहणं स्पष्टार्थम्।**

**अत्र विचारः** - एकग्रहणं किमर्थम्। पूर्वपरयोः स्थाने गुणः, पूर्वपरयोः स्थाने वृद्धिः - इत्येवं तत्र तत्र सूत्रार्थो लभ्यते। गुणः वृद्धिः इत्येवं विधेयसमर्पकपदेषु एकवचनं विवक्षितम्। तथाच पूर्वः पर इति स्थानिद्वये सत्यपि एकवचनप्रयोगाद् एक एवादेशो भविष्यति, न हि एकः आदेशः उभयोरपि स्थाने पृथक् पृथक् भवितुमर्हति। पूर्वस्य स्थाने गुणः स्यात्, परस्य स्थाने गुणः स्यात् इत्येवं वाक्यभेदेन अन्वयो न क्रियते। किन्तु, पूर्वपरस्थाने गुणः स्यादित्येवम् एकमेव वाक्यम्। यथा - अनयोः पूलयोः कटं कुरु इत्युक्ते पूलद्वयसम्बन्धी एक एव कटः क्रियते, न तु एकेन पूलेन एकः कटः, अपरेण पूलेन अपरः कट इत्येवं सम्भवति।

अवर्णात् परस्य अचः, अचः पूर्वस्य अवर्णस्य - पूर्वपरयोः तयोः अवर्णाचोः स्थाने गुणः - इत्येवं सूत्रार्थः तत्र तत्र सम्भवति। तथाच एकग्रहणं सूत्रे किमर्थम् - इति प्रश्नः।

**उत्तरम्** – एकग्रहणं स्पष्टप्रतिपत्त्यर्थम् - इति सिद्धान्तः।

### 3.0 उरण् रपरः

कृष्ण + ऋद्धि इत्यवस्थायाम् अकारऋकारयोः आद्गुण इति सूत्रेण एकादेशे गुणे प्रसक्ते उरण् रपर इति सूत्रेण प्रसङ्गावस्थायामेव अकारस्य रपरत्वं भवति। तथाच - कृष्ण् अर् द्धि - कृष्णर्द्धि इति सिध्यति। तत्र उरण् रपर इति सूत्रं व्याख्यायते - उः इति षष्ठ्यन्तम्। षष्ठी स्थानेयोगा इति परिभाषानुसारेण उः स्थाने इत्यर्थः सिध्यति। विधौ परिभाषोपतिष्ठते नानुवादे इति तु पदोपस्थापकपरिभाषाविषये। अन्याः परिभाषाः अनुवादेऽपि व्याप्रियन्ते यथा उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य इत्यत्र उदात्तस्वरितयोः स्थाने यो यण् तस्य स्थाने इत्यर्थः।

स्थानेऽन्तरतमः इत्यतः स्थानेपदमनुवर्तते। तस्य च लक्षणया प्रसङ्गावस्थायामित्यर्थः। अण् इति पूर्वेण णकारेण प्रत्याहारः। असृन्तृच्………. इति सूत्रे प्रशास्तृणामिति निर्देशात् ज्ञापकात्। तथाहि- प्रशास्तृ नाम् इति स्थिते नामि इति सूत्रेण ऋकारस्य ह्रस्वस्य स्थाने दीर्घे ऋवर्णे आदेशे कृते यदि सोपि अण् अभविष्यत् तर्हि तत्रापि रपरत्वं कर्तव्यमभविष्यत्। तथा अकरणात् ज्ञायते पूर्वेण णकारेण प्रत्याहार इति। तथाच - उः प्रसङ्गे प्रसङ्गावस्थायामेव अण् रपरः -इति सूत्राशयः।

**शेखरे - रपर इत्यवयववाचिना परशब्देन षष्ठ्यर्थे बहुव्रीहिः, तेन अस्यावयवत्वाद् यदागमा इति न्यायेन विशिष्टस्य गुणवृद्धित्वेन ऋकारस्य गुणवृद्धी अरारावेवेति नियमोपपत्तिः। इत्यादि।**

**रपर इत्यत्र विग्रहः -**

1) रः परो यस्य स इति षष्ठ्यर्थबहुव्रीहिः। परशब्दः परावयववाची। यस्येति अवयवावयविभावे षष्ठी। तथाच - यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इति न्यायेन अर् आर् इर् ईर् उर् ऊर् इति समुदायानामेव आदेशता।
2) अत एव ऋकारस्य गुणवृद्धी अरारावेव इति नियमः उपपद्यते।
3) अत एव - गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तते इति भाष्ये उक्तम्।
4) कैयटेनापि - उः स्थाने अण् प्रसज्यमान एव रपरो भवति, पूर्वभक्तश्च रेफः इति अयं गुणः - इत्युक्तम्।

**अत्र प्रश्नः** - वर्णस्य वर्णान्तरं कथमवयवो भवितुमर्हति, तथाहि हलन्ताच्च इति सूत्रे भाष्यवाक्यम्- अयुक्तोयं निर्देशः कथं हि इको नाम हल् अन्तः स्यात् अन्यस्यान्यः इति।

**समाधानम्** - भाष्ये अनेन विधीयमानो रेफः पूर्वस्य अन्तावयवो वा परस्य आद्यवयवो वा अभक्तो वा इति विचार्य पूर्वस्यान्तावयव इत्येव सिद्धान्तितम्। यद्यपि अवयवत्वं वास्तविकं भवितुं नार्हति। किन्तु अनवयवे अवयवत्वं वचनेन आरोप्यते। ततश्च अवयवसदृश इति फलति। परादित्वे अभक्तत्वे वा वव्रे इत्यादौ वृ वृ ए - वर् वृ ए - इति स्थिते रेफस्य हलादिः शेष इत्यनेन लोपो न सिध्येत्। अभ्यासस्य आदिः हल् शिष्यते, यः अभ्यासस्य आदिभिन्न अवयवः तस्य लोप इत्याशयः सूत्रस्य।

**अत्रान्यः प्रश्नः** - परशब्दस्य दिग्वाचकत्वात् रः परो यस्मात् स इति पञ्चम्यर्थबहुव्रीहिः खलु युक्तः इति।

**अत्र समाधानम्** - पञ्चम्यर्थबहुव्रीहिपक्षे अवयवत्वं न सम्भवति। तथासति - आद्गुणः वृद्धिरेचि इत्यादेः उरण्रपर इति सूत्रेण एकवाक्यतया अवर्णाद् अचि परे रपरो गुणः एकादेशः स्यात् इत्येवमर्थः। तत्र गुणसंज्ञा वृद्धिसंज्ञा वा अकारे आकारे चैव स्यात्, न तु अर् आर् इति समुदाये। तदा तु ऋकारस्य गुणवृद्धी अरारावेव इति नियमो नोपपद्यते।

अणमनूद्य रपरत्वमनेन सूत्रेण विधीयते इति केषाञ्चित् मतम्। तदपि असाधु। आद्गुण इत्यादिसूत्रेण विहितस्य अणः अनेन सूत्रेण रपरत्वं क्रियते इति तदाशयः। तदानीम् अकारस्यैव गुणसंज्ञा स्यात्, न तु रेफविशिष्टसमुदायस्य। तथाच ऋकारस्य गुणवृद्धी अरारावेवेति नियमो भाष्योक्तो नोपपद्येत।

आप्ज्ञप्यृधामीत् भृञामित् ऋत इद् धातोः उदोष्ठ्यपूर्वस्य इत्यादिषु बहुषु स्थलेषु रेफविशिष्टस्योच्चारणं कष्टम्। तस्मादेकेन यत्नेन सर्वत्र यथा सिद्धिः स्यादिति तदर्थमिदं सूत्रम्।

Pathshala
A Gateway to all Post Graduate Courses

## 4.0 एत्येधत्यूठ्सु

शेखरे - ऊठ् अत्र आदेश एव व्याख्यानात्। एचीति न ऊठो विशेषणम् ऊठः तत्त्वासम्भवात्। एत्येधत्योरिति योगं विभज्य तयोरेवैचीति विशेषणस्य भाष्ये कृतत्वाच्च। तदाह-एजाद्योरिति। एतिरत्र इणेव, प्रसिद्धत्वात्। उपैतीत्यादौ वृद्धिरेचीत्यनेन गतार्थत्वमाशङ्क्याह- पररूपगुणेति। एत्येधत्योरेङि पररूपस्य, ऊठि च आद्गुणस्येति विवेकः। उपैधत इति। अत्र न सर्वादेशः। एत्येधत्याद्यवयवे अचीत्येवं क्रमेण सूत्राणामर्थात्।

1. सूत्रार्थः

एतिश्च एधतिश्च ऊठ् च -एत्येधत्यूठः इति द्वन्द्वः। एतिः = इण् (गतौ) धातुः। एधतिः = एध (वृद्धौ) धातुः। वाह ऊठ् इत्यादिसूत्रविहित आदेशः ऊठ्। न तु ऊठ् धातुः, व्याख्यानात्। वृद्धिरेचीति सूत्रात् एचीत्यनुवर्तते। तच्च एत्येधत्योः विशेषणम्। तदादिविधिः। तथाच - अवर्णाद् एजाद्योः एत्येधत्योः ऊठि च परे पूर्वपरयोः वृद्धिरेकादेशः स्यादिति सूत्रार्थः।

Pathshala पाठशाला
A Gateway to all Post Graduate Courses

2. पररूपगुणापवादः

उप + एति

उप + एधते - इति स्थिते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ प्राप्तायां तां बाधित्वा 'एङि पररूपम्' इत्यनेन सूत्रेण पररूपं प्राप्नोति। तदपवादत्वेन इदं सूत्रं पुनरपि वृद्धिं विधत्ते। तथाच - उपैति उपैधते इति सिध्यति। एवम् -प्रष्ठं वहतीत्यर्थे वहधातोः ण्विप्रत्यये ततः द्वितीयाबहुवचने शसि - प्रष्ठ + वह् + ण्वि + शस्। उपधावृद्धिः, ण्विलोपः। प्रष्ठवाह् शस्। वाह ऊठ् इत्यनेन ऊडादेशे प्रष्ठ ऊह् अस्। अत्र आद्गुण इति सूत्रेण गुणे प्राप्ते तदपवादत्वेन वृद्धिरुच्यते।

**3. अत्र न सर्वादेशः**

**अत्र प्रश्नः** - अवर्णाद् एजाद्योः इण्-एध्-धात्वोः परयोः, पूर्वपरस्थाने विहितो वृद्ध्यादेशः। तत्र पर इण्-धातुः एधधातुश्च। तर्हि परस्य सर्वस्य स्थाने कथमादेशो न क्रियत इति।

**उत्तरम्** - इको यणचीत्यतः अचीत्यपि अनुवर्तते। एत्येधत्यूठ्सु इत्यत्र वृक्षे शाखा इत्यत्रेव सप्तमी। एजादिषु एत्येधत्यूठ्सु विद्यमानो योऽच्, अवर्णात् तस्मिन् परे वृद्धिरेकादेशः - इति निष्कृष्टः सूत्रार्थः।

**शेखरे - परे तु इणीकारादौ प्रतिषेधः इति वार्तिके एधत्यनुपादानात् नत्वेधतेरव्यभिचारात् इति वृत्तेश्च अस्यानभिधानमेव। एत्येधत्योरेचीति विशेषण मिति भाष्यस्यैधत्यंशे सम्भवमात्रेणोपरञ्जकतया विशेषणमित्याशय इत्याहुः।**

**4. प्रेदिधदिति**

क) उपेतः ख) मा भवान् प्रेदिधत् - इत्यादिस्थले अतिव्याप्तिः स्यादिति तद्वारणार्थं एजाद्योः एत्येधत्योः इति विशेषणम्। तत्र माङि उपपदे, प्रपूर्वकात् एधधातोः णिचि लुङि –

मा प्र एध् णिच् चङ् लुङ्

मा प्र एधि चङ् त्

मा प्र इधि अ त् (णौ चङ्युपधाया ह्रस्वः)

मा प्र इदिधि अ त् (अजादेर्द्वितीयस्य, चङि)

मा प्र इदिध् अ त् (णेरनिटि)

मा प्र इदिधत्। अत्र एधधातुः न एजादिः।

**अत्र नागेशः**

मा भवान् प्रेदिधद् इत्यादिः प्रयोगो नास्त्येव। यदि स्यात् तर्हि इणि इकारादौ प्रतिषेध इति वार्तिके इणेधत्योरिकारादौ प्रतिषेध इत्येव वदेत्। काशिकावृत्तावपि एज्ग्रहणमेतैरेव विशेषणमित्युक्तम्। एत्येधत्योरेचीति विशेषणमिति भाष्योक्तौ एधतिविषये एजादिरिति उपरञ्जकविशेषणम्।

उप एधयते - उपैधयते इत्यादौ णिजन्तत्वेन शब्दान्तरत्वेऽपि इदं सूत्रं प्रवर्तत एव। एत्येधत्योरचि इत्यर्थकरणात्।

**5. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्**

पुरस्तादपवादन्यायेन इयं वृद्धिः एङि पररूपमित्यस्यैव बाधिका न तु ओमाङोश्चेत्यस्य, तेन अवैहि इति वृद्धिरसाधुरेव -इति कौमुदीस्थं वाक्यम्।

अव आङ् इहि इति स्थिते अव एहि इति जाते ओमाङोश्च इत्यनेन पररूपे अवेहि इति रूपमिष्टम्। परन्तु अन्तादिवच्च इति न्यायेन एहि इत्यस्य एजादित्वात् इण्धातुत्वाच्च तस्मिन् परे ओमाङोश्च इति पररूपं बाधित्वा एत्येधत्यूठ्सु इत्यनेन वृद्धिः प्राप्नोति। तत्रोच्यते - एत्येधत्यूठ्सु इति अपवादः। स्वबाध्यः उत्सर्गस्तु पश्चात् पठ्यते। स च इत्याकाङ्क्षायां प्रथमोपस्थितस्य एङि पररूपमित्यस्य बाधनेन निवृत्ता आकाङ्क्षा इति कृत्वा ततः पश्चात् पठित उत्सर्गो न बाध्यते। तथाच अव एहि इत्यवस्थायाम् एत्येधत्यूठ्सु ओमाङोश्च इत्यनयोः प्राप्तयोः परत्वात् पररूपमेव प्रवर्तते।

ओमाङोश्च - एङि पररूपमित्यनन्तरमिदं सूत्रम्। 'आद् गुण' इति सूत्राद् आदित्यनुवर्तते। अवर्णात् ओमि आङि च परे पूर्वपरयोः पररूपमेकादेशः स्यादिति सूत्रार्थः।

**अत्र संशयः** - पूर्वसूत्राद् एङीत्यनुवर्तताम्, अवर्णात् परयोः एङाद्योः ओमाङोः पूर्वपरस्थाने पररूपैकादेशः स्यादिति सूत्रार्थश्च अस्तु, एङीत्यस्यानुवर्तनार्थमेव अस्मिन् सूत्रे चकारः - इति।

**उत्तरम्** - एङीत्यस्यानुवृत्तौ शिव + आ + इहि = शिव + एहि = शिवेहि इत्येवं यत्र एकादेशेन एकारादिरेङ् लभ्यते तत्रैव सूत्रप्रवृत्तिः स्यात्। आ + ऋषभः = अर्षभः, अद्य+अर्षभः = अद्यर्षभः इत्यादौ एङादित्वाभावे पररूपं न सिध्येत्। तस्मात् एङीति नानुवर्तते, चकारो व्यर्थः - इति सिद्धान्तः।

**अत्र प्रश्नः** - अद्य + अर्षभ इति स्थिते 'ओमाङोश्च' इति पररूपं परत्वात् बाधित्वा "अकः सवर्णे दीर्घः" कथं न स्यात् - इति।

'ओमाङोश्च' इति प्रतिपदविधिः, तस्मात् स एव दीर्घस्य बाधको भविष्यति - इति चेत्। प्रतिपदविधित्वमपि निरवकाशत्वे सत्येव बाधकत्वे प्रयोजकम्। 'ओमाङोश्च' इति हि (शिव + एहि) इत्यादौ सावकाशम्। तथाहि – 'मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन 'ओमाङोश्च' इत्येतत् शिव + एहि इत्यादौ 'वृद्धिरेचि' इति वृद्धिमेव बाधते, न तु (अद्य + अर्षभ) इत्यादौ सवर्णदीर्घम्।

**अत्र समाधानम्** - लक्ष्यानुरोधात् प्रकृते बाध्यसामान्यचिन्ता आश्रीयते। बाध्यविशेषचिन्तायामेव पूर्वस्य बाधने सति, बाध्यान्तराकांक्षाया अनुत्थितिः। बाध्यसामान्यचिन्तायां यद् यद् बाधितुं शक्यं तत् सर्वं बाध्यत एव।